जागरिता, [ऋ] त्रि, (जागर्त्तीति । जागृ + तृच् ।) जागरणशीलः । इत्यमरः । ३ ।१।३२॥

जागरी, [न्] त्रि, (जागरो जागरणमस्यस्तीति । जागर + "अत इनिठनौ ।" ५।२।११५ । इति इनिः ।) जागरूकः । इति हेमचन्द्रः । ३।१०७॥

जागरूकः, त्रि, (जागर्त्तीति । जागृ + "जागरूकः ।" ३ । २ । १६५ । इति ऊकः ।) जागरणशीलः । जागरणकर्त्ता । तत्पर्य्यायः । जागरिता २ । इत्यमरः । ३।१ । ३२ ॥ जागरी ३ । इति हेमचन्द्रः ।३।१०७॥ (यथा, रघुः ।१०।२४।
"अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥"
कर्त्तव्यपालनादौ अप्रमत्तः । यथा, रघुः । १४ । ८५ ।
"निगृह्य शोकं स्वयमेव धीमान्
वर्णाश्रमावेक्षणजागरूकः ॥")

जागर्त्तिः, स्त्री, (जागृ + भावे क्तिन् ।) जागरणम् । इत्यमरटीकायां रायमुकुटः ॥

जागर्य्या, स्त्री, (जागृ + "जागर्त्तेरकारो वा ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिकोक्त्या यक् । "जाग्रोऽविचीति ।" ७ । ३ । ८५ । इति गुणः ।) जागरणम् । इत्यमरः । ३ । १ ।२६ ॥

जागुडं, क्ली, (जागुडे तदाख्यया प्रसिद्धे देशे भवमित्यण् ।) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (देशविशेषः । यथा, माघे । २० । ३ ।
"अभिषेद्यमगाद्यथोऽपि शौरे-
रवनिं जागुडकुङ्कुमाभिताम्रैः ॥"
जागुडोऽभिजनोऽस्येत्यण् । तद्देशवासिनि, त्रि, । यथा, महाभारते । ३ । ५१ । २४ ।
"जागुडान् रामठान् मुण्डान् स्त्रीराज्यानथ-
तङ्गणान् ॥")

जागृ, र जु जागरे । इति कविकल्पद्रुमः ॥ (अदां-परं-अकं-सेट् ।) र, जागृयात् । जु, जागर्त्ति । दिशो निरीचमाणस्य नास्ति जागरतो भयमिति पचादित्वादच् जागर इत्याचरतीति क्वौ शत्रन्तम् । इति दुर्गादासः ॥

जागृविः,पुं, (जागर्त्ति साक्षिरूपतयेति । जागृ + "जॄशॄस्तृजागृभ्यः क्विन् ।" उणा । ४ । ५४ । इति क्विन् ।) अग्निः । इति हेमचन्द्रः । ४ । १६५ ॥ (यथा, ऋग्वेदे । ५ । ११ । १ ।
"जनस्य गोपा अजनिष्ट जागृविरग्निः ॥"
जागर्त्ति प्रजानां शुभाशुभकार्य्यदर्शनार्थमिति । नृपतिः । इत्युज्ज्वलदत्तः ॥)

जाग्रत्, त्रि, (जागर्त्तीति । जागृ + शतृ ।) जागरणविशिष्टः । यथा,—
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणि-
स्फूर्ज्जत्फुत्कृतिभीतिसम्भृतचमत्कारस्फुरत्-
सम्भ्रमा ॥"
इति काव्यचन्द्रिका ॥
(जागरणम् । यथा, मनौ । १ । ५७ ।
"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्व्वं चराचरम् ।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ॥")

जाग्रिया, स्त्री, (जागृ + "जागर्त्तेरकारो वा ।" इति पक्षे शस्ततो रिङादेशः ।) जागरणम् । इत्यमरटीकायां रायमुकुटः ॥

जाघनी, स्त्री, (जघनस्य समीपम् । जघन + शैषिकोऽण् । ततः स्त्रियां ङीप् ।) पुच्छः । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । १०।१०८ ।
"क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघनीम् ।
चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः ॥"
विश्वामित्रस्य श्वाघनीहरणकथा महाभारते शान्तिपर्व्वणि १४१ अध्याये द्रष्टव्या ॥)

जाङ्गलं, क्ली, (जाङ्गलेषु स्थलजपशुविशेषेषु भवम् । जाङ्गल + अण् ।) मांसम् । इति हेमचन्द्रः ॥

जाङ्गलः, पुं, (जङ्गले भवः । जङ्गल + अण् ।) कपिञ्जलपक्षी । इति मेदिनी । ले, ६५ ॥ निर्ज्जलदेशः । इति शब्दरत्नावली ॥ (अस्य लक्षणं यथा,—
"स्वल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः ।
स ज्ञेयो जाङ्गलो देशः बहुधान्यादिसंयुतः ॥")
भावप्रकाशमतेऽस्य लक्षणं यथा,—
"आकाशशुभ्र उच्चश्च स्वल्पपानीयपादपः ।
शमीकरीरविल्वार्कपीलुकर्कन्धुसङ्कुलः ॥
हरिणैणर्क्षपृषतगोकर्णखरसङ्कुलः ।
सुस्वादुफलवान् देशो वातलो जाङ्गलः स्मृतः ॥"
("खरपरुषविशालाः पर्व्वताः कण्टकीर्णाः
दिशि दिशि मृगतृष्णा भूरुहाः शीर्णपर्णाः ।
अतिखरविरश्मिः पांशुभृत् शुष्कभूमिः
सरसरसविहीनः कूपकाम्भःप्रकर्षः ॥
तदनुविरसशस्याहारतो गोमनुष्यः
प्रभवति रसमांसं रूक्षभावश्च सम्यक् ।
पुनरपि हिमवाहं शालिशस्यं न चेत्तु-
र्भवति रुधिरपित्तं कोपमाशु प्रयाति ॥"
इति च हारीते प्रथमस्थाने चतुर्थेऽध्याये ॥)
तस्य गुणाः । वातपित्तकारित्वम् । उष्णत्वम् । रूक्षत्वञ्च । तद्देशीयजलगुणाः । अनूपदेशात् विपरीतत्वम् । इति राजवल्लभः ॥ रूक्षत्वम् । लवणत्वम् । लघुत्वम् । तनुत्वम् । पथ्यत्वम् । वह्निकफबहुविकारकारित्वञ्च । इति भावप्रकाशः ॥ जङ्गलदेशोद्भवश्च ॥

जाङ्गलः, त्रि, स्थलजपशुविशेषः । यथा,—
"हरिणैणकुरङ्गर्क्षपृषतन्यङ्कुशम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गलसंज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥
ऋष्यो नीलाङ्गको लोके स रोझ इति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् किञ्चिदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः ॥
यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते ॥"
तस्य मांसस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । लघुत्वम् । बल्यत्वम् । बृंहणत्वम् । हृद्यत्वम् । दीपनत्वम् । दोषहरत्वम् । मूकत्व-मिन्मिनत्वगद्गदत्वार्दितबाधिर्य्यारुचिपिच्छहिंप्रमेह-सुखजरोगश्लीपदगलगण्डवायुनाशित्वञ्च । इति भावप्रकाशः ॥ शीतत्वम् । मनुष्यहितत्वम् । इति राजवल्लभः ॥ * ॥

जाङ्गलिः, पुं, (जाङ्गलो जङ्गलभवः सर्पादिर्ग्राह्यतयास्यास्तीति । जाङ्गल + बहुलवचनात् इञ् ।) व्यालग्राही । इति शब्दरत्नावली ॥

जाङ्गली, स्त्री, (जङ्गले भवा । जङ्गल + अण् । ततो ङीप् ।) शूकशिम्बी । इति । मेदिनी । ले, ६५ ॥ (यथास्याः पर्य्यायाः ।
"कपिकच्छुरात्मगुप्ता वृष्या प्रोक्ता च मर्कटी ।
अजरा कण्डुरा चण्डा दुःस्पर्शा प्रावृषायणी ॥
जाङ्गली शूकशिम्बी च सैव प्रोक्ता महर्षिभिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जाङ्गुलं, क्ली, (जङ्गुलमेव । स्वार्थे अण् ।) विषम् । जालिनीफलम् । इति शब्दरत्नावली ॥

जाङ्गुलिः, पुं, (जङ्गुलं विषं व्यवहार्य्यतया विद्यतेऽस्येति । जङ्गुल + बाहुलकात् इञ् ।) विषवैद्यः । इति शब्दरत्नावली ॥ सापुड़े इति भाषा ॥

जाङ्गुलिकः, पुं, (जाङ्गुली विषप्रधानः सर्पादिर्ग्राह्यतयास्यास्तीति । जाङ्गुल + ठन् ।) व्यालग्राही । इत्यमरः । १ । ८ । ११ ॥

जाङ्गुली, स्त्री, (जङ्गुलस्य इयम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् । ततो ङीप् ।) विषविद्या । इति हेमचन्द्रः ॥

जाङ्घिकः, पुं, (जङ्घाभिश्चरतीति । जङ्घा + "पर्पादिभ्यष्ठन् ।" ४।४।१० । इति ठन् । यद्वा, जङ्घाभिर्जीवतीति । "वेतनादिभ्यो जीवति ।" ४ । ४ । १२ । इति ठञ् ।) उष्ट्रः । शीकारीमृगः । इति राजनिर्घण्टः ॥ जङ्घाजीवी । धावकादिः । तत्पर्य्यायः । जङ्घाकरिकः २ । इत्यमरः । २ । ८ । ७३ ॥ (प्रशस्तजङ्घाविशिष्टे, त्रि । यथा, भोजराजकृतयुक्तिकल्पतरौ ।
"जाङ्घलक्ष्मा जाङ्घिकाश्च भ्राम्यन्ते राजसा
मताः ॥")

जाज्वल्यमानः, त्रि, (भृशं ज्वलतीति । ज्वल + यङ् + शानच् ।) देदीप्यमानः । यथा, चण्डी ।
"जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥"

जाटलिः, पुं स्त्री, (जाटं सङ्घातं लातीति । ला + बाहुलकात् किः ।) वृक्षविशेषः । इति शिक्षादिसंग्रहे अमरः ॥

जाड्यं, क्ली, (जडस्य भावः । जड + ष्यञ् ।) जडता । तत्पर्य्यायः । स्तम्भः २ । (यथा, पञ्चदशी । ६ । ६६ ।
"बिना जाड्यानुभूतिं न कथञ्चिदुपपद्यते ॥")
मौर्ख्यम् । इति हेमचन्द्रः ॥

जाड्यारिः, पुं, (जाड्यस्य अरिः शत्रुः । भक्षणेन जाड्यदोषनिराकरणात् तथात्वम् ।) जम्बीरः । इति राजनिर्घण्टः ॥

जातं, क्ली, (जन + कर्त्तरि क्तः ।) व्यक्तम् । समूहः । (यथा, भट्टिः । ३ । ३३ ।
"अग्न्याहुतिं ह्रावयितुं सविप्रा-
श्चिचीषवोऽस्थीन्यथ पात्रजातम् ॥"